# tripurasundarImAnasapUjanastotram

# ત્રિપુરસુન્દરીમાનસપૂજનસ્તોત્રમ્

## Document Information

Text title : tripurasundarImAnasapUjanastotram

File name : tripurasundarImAnasapUjanastotram.itx

Category : devii, devI, dashamahAvidyA

Location : doc_devii

Author : sAmarAjadIkShita

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : March 23, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ત્રિપુરસુન્દરીમાનસપૂજનસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

અમૃતજલધિમધ્યોલ્લાસિરત્નાન્તરીપ-
પ્રસૃમરકિરણાલીકલ્પિતોદ્યાનશોભે ।
સુરતરુનિકુરમ્બસ્પૃષ્ટવાતાયનાન્ત-
શ્વલદલિપટલીભિઃ ક્લૃપ્તધૂપાદિકૃત્યે ॥ ૧॥

મણિમયભવનેઽન્તઃપ્રૌઢમાણિક્યશાલા-
મધિવસતિ વિશાલા કાપિ તે રત્નવેદી ।
તદુપરિકૃતવાસં દત્તબાલાર્કહાસં
દિશતુ શુભમનન્તે દેવિ સિંહાસનં તે ॥ ૨॥

તદુપરિ ધૃતનાનાહેતિભૂષાશ્મરશ્મિ-
વ્યતિકરપુનરુક્તીભૂતરમ્યોત્તરીયામ્ ।
ગલદમલદયામ્ભઃસિક્તભક્તપ્રરોહાં
પ્રણવનલિનભૃઙ્ગીં ભાવયે જ્ઞાનભઙ્ગીમ્ ॥ ૩॥

દ્રુહિણહરિહરાણાં મૌલિસઞ્ચારશીલં
મણિઘટિતવિભૂષારશ્મિનિર્ણેજિતં ચ ।
નિજમતિદૃષદાહં ભક્તિગઙ્ગાપયોભિઃ
પદયુગમમલં તે દેવિ નિર્ણેજયામિ ॥ ૪॥

ગરુડમણિમયૂખસ્પર્ધિદૂર્વાસનાથૈઃ
કુશશિશુપરિજુષ્ટૈઃ સ્ફીતસિદ્ધાર્થસાર્થૈઃ ।
ઉપહિતસિતગન્ધૈઃ સાક્ષતૈર્વારિભિસ્તે
જનનિ ચરણપદ્મે પાદ્યમાદ્યં દદામિ ॥ ૫॥

ફલકુસુમસનાથં નૂત્નરત્નપ્રરોહં
મલયજરસદિગ્ધં સ્નિગ્ધમુગ્ધાક્ષતં ચ ।

દરનિયમિતભક્તાનીકવાઞ્છાપ્રદાને
કરસરસિરુહેઽસ્મિન્નર્ઘ્યમર્ઘ્યે દદામિ ॥ ૬॥

શિશિરકિરણજાતીપત્રદેવપ્રસૂન-
સ્ફુટિતદલનવૈલાક્રાન્તકક્કોલગન્ધમ્ ।
શિશિરમમલમેતદ્બ્રદ્ધપીયૂવસખ્યં
સલિલમખિલમાતસ્ત્વં પ્રસન્નાઽઽચમેથાઃ ॥ ૭॥

નવમણિહયપીઠે પ્રેતપદ્મસ્થિતાપિ
પ્રપદતરલશોભાસ્પૃષ્ટસદ્વિષ્ટરશ્રિ ।
દધિમધુઘૃતમિશ્રં ત્રિર્વિરાજોપનીતં
શશિમુખિ મધુપર્કં ત્વં મુખાન્તર્નયેથાઃ ॥ ૮॥

પુનરાચમનં કાર્યં જગજ્જનનિ સુવ્રતે ।
ત્વચ્છિક્ષિતેન માર્ગેણ યતો લોકઃ પ્રવર્તતે ॥ ૯॥

ત્વરિતસહચરીભિર્દત્તહસ્તાવલમ્બં
ચરણનલિનમેતત્પાદુકાસ્થં વિધાય ।
પ્રવિશ વિવિધશાલં સ્નાનગેહાન્તરાલં
પશુપતિસહિતૈવાભ્યઙ્ગમઙ્ગીકુરુષ્વ ॥ ૧૦॥

અપિ રસિકવિગીતં ભક્તચિત્તાનુમત્યૈ
સદયહૃદયભાવે સ્નાહિ પઞ્ચામૃતેન ।
શશિમૃગમદમુસ્તાગારસિદ્ધાર્થચૂર્ણૈઃ
કુસુમજલવિમિશ્રૈઃ સ્વૈરમુદ્વર્તયાઙ્ગમ્ ॥ ૧૧॥

પરિજનપરિમૃષ્ટે ત્વચ્છરીરે ન યાવ-
ચ્છિશિરસલિલધારાં કાપિ ચિક્ષેપ તાવત્ ।
ઉદયિનિ જનમાતઃ સીત્કૃતે બદ્ધભાવૈ-
સ્ત્રિપુરમથનહાસૈર્વ્રીડિતં ક્રીડિતં તે ॥ ૧૨॥

અથ વિમલિતરત્નસ્વર્ણદુર્વર્ણકુમ્ભૈ-
સ્ત્રિભુવનગતતીર્થાનીતપાનીયપૂર્ણૈઃ ।
સ્નપયતિ સુરનારીવૃન્દમેતત્તથાપિ
પ્રણયજલમિદં નઃ સ્નાનકૃત્યં કરોતુ ॥ ૧૩॥

વિમલધવલચીનપ્રચ્છદપ્રાવૃતાઙ્ગ્યા-

સ્તવ શિરસિરુહેભ્યો નિર્હરેડમ્બામ્બુબિન્દુન્ ।
અગરુશકલધૂપૈર્ધૂપ્યતાં ચાઙ્ગમઙ્ગં
સહ પશુપતિના ત્વં યાહિ વાસોગૃહાન્તઃ ॥ ૧૪॥

નવવિમલવિચિત્રે વાસસી નૂત્નરત્ન-
દ્યુતિકૃતપુનરુક્તાયામસંશોભિની તે ।
અથ કુચપરિણાહાચ્છાદિનીં શુમ્ભનેત્ર-
ત્રિતયભવદસૂયાં કઞ્ચુકીમર્પયામિ ॥ ૧૫॥

નહનમપિ કચનાં કઙ્કતીભિર્વિધાય
ગ્રથિતમણિવિભૂષાં દેવિ વેણીં કરોમિ ।
નિહિતનવકિરીટાલમ્બિમુત્તબાલતાભિ-
સ્તતબહલમયૂખાં ચન્દ્રલેખા વિદધ્યામ્ ॥ ૧૬॥

અલિકતલવિલમ્બિસ્ફીતસીમન્તમુક્તા-
સરણિધટિતહીરાસ્પષ્ટચન્દ્રાત્તતન્દ્રે ।
વિવિધમણિગણાઙ્કોત્તંસસંશ્લિષ્યદશ્મા
શ્રવણયુગવિભૂષા દેવિ તોષાય ભૂયાત્ ॥ ૧૭॥

વિવિધવિરચનાભિર્ભિન્નભિન્ના વિભૂષા
જનયતુ તવ કણ્ઠે દેવિ કામપ્યભિખ્યામ્ ।
ગુણિનમપિ ગિરીશશ્લેપદત્તાન્તરાયં
કઠિનકુચયુગાગ્રે હારમારોપયામિ ॥ ૧૮॥

દરતરલવિલમ્બિસ્વર્ણસૂત્રાન્તગુચ્છે
જનનિ તવ દિશેતામઙ્ગદે શર્મકર્મ ।
અથ વલયમણીનાં રશ્મિસમ્ભિન્નમુદ્રાં
જનયતુ પુનરુક્તાં શૃઙ્ખલામન્તરીણામ્ ॥ ૧૯॥

મણિમયરશનાધઃક્ષુદ્રઘણ્ટાનિનાદા
મણિતગુણનિકાનાં સ્મારકાઃ સ્યુઃ શિવસ્ય ।
મરકતમણિજાતં મઞ્જુમઞ્જીરયુગ્મં
રચયતુ શશિમૌલે રઞ્જનં સિઞ્જિતેન ॥ ૨૦॥

અરુણમણિકૃતાનામઙ્ગુલીભૂષણાનાં
પ્રભવતુ પદમુસ્રૈર્લાક્ષયા રઞ્જિતં તે ।
મૃગમદરચિતાયાં પત્રભઙ્ગીલતાયા-

મનુભવતુ દૃગન્તો બન્ધનં ભૂતભર્તુઃ ॥ ૨૧॥

ભજ જનનિ હરિદ્રાં દત્તહારિદ્રમુદ્રાં
કુસુમસલિલતૈલાક્રાન્તકાશ્મીરકોશામ્ ।
અથ નસિ કુરુ મુક્તાં દન્તવાસોઽનુષક્તાં
સ્મિતરુચિપુનરુક્તાં નન્દિતાનેકભક્તામ્ ॥ ૨૨॥

સહજનલિનનીલે ખઞ્જને ખઞ્જનાનાં
ભવનિગડગતાનાં મોચને લોચને તે ।
જનનિ ગિરિશચેતોરઞ્જને મન્દમન્દં
મસૃણિમસૃણિતૈસ્તૈરઞ્જનૈરઞ્જનેયમ્ ॥ ૨૩॥

પ્રણતિભિરુપનીતં દીપ્તલાલાટનેત્ર-
પ્રતિભટમિવ શમ્ભોર્મૃત્યુબાધાવિરોધિ ।
શશિન ઇવ મુખેન્દોર્ભેદકઃ કોઽપિ ધર્મો
જનયતુ મુદમુચ્ચૈઃ કુઙ્કુમં રઙ્કુનેત્રે ॥ ૨૪॥

યુગપદુપગતેન્દ્રોપેન્દ્રરુદ્રાદિમૌલિ-
સ્થલમુકુટવિઘટ્ટચ્ચણ્ડદણ્ડાભિઘાતૈઃ ।
કૃતસરણિરજસ્રક્રુદ્ધદૌવારિકૈસ્તે
જનનિ ભવ વિભૂષા પ્રેતપદ્માસનસ્ય ॥ ૨૫॥

અહમહમિકયાધઃ પાતુકાનાં સુરાણાં
પ્રપદમપિ શરીરે દેવિ સંયોજ્ય શીઘ્રમ્ ।
કરુણરસમયીનાં લોચનાન્તચ્છટાનાં
કતિપયવલનાભિર્દેહિ પૂજાવકાશમ્ ॥ ૨૬॥

અગરુઘુસૃણચોરીશીરગોરોચનાભિઃ
મલયજમૃગનાભિસ્ફીતકર્પૂરપૂરૈઃ ।
કુસુમસલિલઘૃષ્ટૈઃ કલ્પયિત્વાઙ્ગરાગં
પટુતરપટવાસૈર્વાસયે તેઽઙ્ગકાનિ ॥ ૨૭॥

કમલકુમુદમલ્લીમાલતીકુન્દજાતી-
બકુલકનકનીપાશોકચામ્પેયકાદ્યૈઃ ।
મરુબકતુલસીભિઃ કેતકીબિલ્વપત્રૈઃ
દમનકશતપત્રૈરર્ચયે ત્વત્પદાબ્જમ્ ॥ ૨૮॥

હારશેખરવતંસશાટિકાપ્રચ્છકાતુલિતકઞ્ચુકીમુખૈઃ ।
મણ્ડપૈર્જવનિકાભિરુચ્ચકૈઃ કૌસુમૈસ્તવ મુદં કદમ્બયે ॥ ૨૯॥

કનકમયહસન્તીકોટિમધ્યસ્થિતાનાં
મૃદુપવનધુતાનાં દીપ્તવૈશ્વાનરાણામ્ ।
અગરુમુપરિ હુત્વા ગુગ્ગુલું સર્જખણ્ડાન્
ઘૃતજતુપરિમિશ્રં ત્વાં શિવે ધૂપયામિ ॥ ૩૦॥

ધૂપવર્તિતરમન્તરાન્તરા ગન્ધતૈલપરિપૂર્ણદીપિકાઃ ।
આવહન્તુ તવ પાર્શ્વયોસ્તરામમ્બિકે જવનિકાપટશ્રિયમ્ ॥ ૩૧॥

સુરસુરભિજસર્પિઃપૂરિતે રત્નપાત્રે
હિમકિરણરજોભિર્લોડિતાં તૂલવર્તીમ્ ।
તરુણદહનયુક્તામમ્બ કૃત્વા દદેયં
નિરયનિરસનાય પ્રસ્ફુરન્તં પ્રદીપમ્ ॥ ૩૨॥

રજતકનકહીરાદ્યશ્મપાત્રેષુ માતઃ
વિવિધરસસનાથૈશ્ચોષ્યલેહ્યપ્રપેયૈઃ ।
ઉપાહિતબહુભક્ષ્યૈર્વ્યઞ્જનૈશ્ચારુખાદ્યૈઃ
જઠરદહનતૃપ્તિં નિત્યતૃપ્તે ચરેથાઃ ॥ ૩૩॥

પરસ્પરકુતૂહલૈઃ કવલદાનરૂપૈઃ શિવે
પુરાણતરુણૌ યુવાં ચરતમત્ર લીલાશિતમ્ ।
સુગન્ધિ સલિલં તથા પિબતમેણનાભીરસૈઃ
સકેસરનિશાકરૈ રચયતં કરોદ્વર્તનમ્ ॥ ૩૪॥

પનસકદલજમ્બૂકર્કટીહારહૂરામલક-
બદરનિમ્બૂદુમ્બરૈર્બીજપૂરૈઃ ।
અમૃતલકુચબિલ્વૈર્દાડિમીનાલિકેરૈ
રુચિરુચિતફલૈસ્તે વર્ધતાં બદ્ધરાગા ॥ ૩૫॥

શશિકરધવલાનાં નાગવલ્લીદલાનાં
ક્રમુકકદરજાતીચન્દ્રસંયોગભાજામ્ ।
મૃગમદસુરસૂનુસ્ફીતચૂર્ણાવૃતાનાં
ભજતુ જનનિ રાગં ત્વન્મુખામ્ભોજમેતત્ ॥ ૩૬॥

કનકભરિતપૃથ્વીં માનુષાનન્દમાહુ-

સ્તદુપરિ શતકોટિક્રામુકાનન્દમાહુઃ ।
જનનિ તવ દદેયં દક્ષિણાં કાં તથાપિ
પ્રથય મયિ દૃગન્તં દક્ષિણાવીક્ષણેન ॥ ૩૭॥

ત્રિભુવનકુહરેઽસ્મિન્પૂરિતે વેણુવીણા-
પટુપટહકઝિલ્લીતાલઘણ્ટાનિનાદૈઃ ।
ઉરગસુરવધૂભિર્ગીયમાનં સમન્તાત્
જનયતુ પદમુચ્ચૈર્દેવિ નીરાજનં તે ॥ ૩૮॥

પ્રાણેષુ પઞ્ચસુ નિધાય ષડાત્મવૃત્તિ-
વર્તીશ્ચિદગ્નિપરિચુમ્બિતજાતશોભાઃ ।
નીરાજયામિ ભવતીં ભવતીવ્રતાપ-
નિર્વાપહેતુમધુના મધુનાઽલસાક્ષિ ॥ ૩૯॥

ઉરગતુરગહંસકેકિશાલૂરભૃઙ્ગી-
મદકલકલવિઙ્કીશ્યેનપારાવતાનામ્ ।
ગતિભિરુપચિતોઽયં મૌલિતઃ પાદમૂલં
હરતુ દુરિતજાતં દેવિ કર્પૂરદીપઃ ॥ ૪૦॥

જય દેવિ જય દેવિ જય વિશ્વાધારે
દીનાનાથોદ્ધરણપ્રવણે જનસારે ।
ત્વત્પદપદ્મે પદ્મે વિધૃતવ્યાપારે
મયિ દીને કુરુ કરુણાં કરુણામૃતપારે ॥ ૪૧॥

અમૃતોદધિમધ્યસ્થિતનવરત્નદ્વીપે
વિષ્વગ્વિકસિતસુરતરુનવચમ્પકનીપે ।
નાનાકુસુમામોદિનિ વિધુતાગરુધૂપે
ચિન્તામણિભવનેઽઙ્ગનતિષ્ઠત્સુરભૂપે ॥ ૪૨॥

માણિક્યોજ્જ્વલચત્વરસિંહાસનશોભે
શવપઞ્ચકમઞ્ચેઽઞ્ચિતજનલોચનલોભે ।
સુશ્વેતાતપવારણચલચામરદમ્ભે
ધ્યાયે ભવતીમનિશં કૃતજગદારમ્ભે ॥ ૪૩॥

દલિતજપાકુસુમોપમવસનચ્છન્નાઙ્ગીં
તરુણારુણકરુણપ્રદકિરણાવલિભઙ્ગીમ્ ।
દધતીં રચનાં નયને યમુનાતારઙ્ગીં

કલયન્તીં કુચકોશે સુષમાં નારઙ્ગીમ્ ॥ ૪૪॥

શરપઞ્ચકબાણાસનસૃણિપાશોલ્લસિતાં
મલયાનિલપરિવાદદમુખપદ્મશ્વસિતામ્ ।
બાલામૃતકરમણ્ડિતચૂડાતટમીહતાં
જ્યોતિસ્ત્રિતયાલઙ્કૃતનયનત્રયસહિતામ્ ॥ ૪૫॥

પશુપતિયન્ત્રણપટુતરરોમાવલિયૂપાં
મન્મથતસ્કરગુપ્તિક્ષમનાભીકૂપામ્ ।
પ્રપદાલમ્બિશિખામણિવૃન્દારકભૂપાં
કમલાસનહરિહરમુખચિન્ત્યામિતરૂપામ્ ॥ ૪૬॥

કાલી બગલા બાલા તારા ભુવનેશી
વારાહી માતઙ્ગી કમલા વચનેશી ।
છિન્ના દુર્ગા ગઙ્ગા કાશી કામેશી
ત્વત્તો નાન્યત્કિઞ્ચિત્ત્વં ચિદ્રસપેશી ॥ ૪૭॥

ત્વં ભૂમિસ્ત્વં સલિલં ત્વં તેજઃ પ્રબલં
ત્વં વાયુસ્ત્વં વ્યોમ ત્વં ચિત્તં વિમલમ્ ।
ત્વં જીવસ્ત્વં ચેશસ્ત્વં બ્રહ્માસ્યમલં
સત્યાનૃતયોરન્યત્ત્વત્તઃ કિં સકલમ્ ॥ ૪૮॥

કુલકુણ્ડે ત્વં કુરુષે શયને પ્રસ્વાપં
સ્વાધિષ્ઠાને મિહિરાયુતદીધિતિતાપમ્ ।
નીલા નાભૌ કણ્ઠે શશિભા હૃતપાપં
વર્ષસ્યમૃતં બિન્દાવાનન્દાવાપમ્ ॥ ૪૯॥

ત્વત્પદપદ્મે ચિત્તં ત્રિપુરે મે રમતાં
તત્રૈવ પ્રતિવેલં મૌલિર્મે નમતામ્ ।
યાતાયાતક્લેશઃ સદ્યઃ સંશમતાં
યાચે ભૂયો ભૂયો ભવતા મે ભવતામ્ ॥ ૫૦॥

નૃત્યતિ ગાયતિ સુરસં સુરનારીવૃન્દે
કરતાલીદાનોત્સુકસુરવિતતાનન્દે ।
નીરાજનકાલે તવ મુનિજનનુતવેદે
ચરણાનતસમ્રાજઃ પરિહૃતભવખેદે ॥ ૫૧॥

મિલદલિપટલીભિઃ કેવલં ઘ્રાતપૂર્વૈઃ
સ્ફુટિતકુસુમગર્ભૈઃ સ્વૈરસઞ્ચારિણીભિઃ ।
ઉપહિતપટવાસઃ પુષ્પધૂલીકદમ્બૈઃ
પ્રભવતુ પદપાતી દેવિ પુષ્પાઞ્જલિસ્તે ॥ ૫૨॥

સકૃદપિ વિનતાઙ્ઘ્રિસ્ત્વાં પરિક્રમ્ય માતઃ
ભવતિ મખફલેષુ ક્ષીણલોભં મનો નઃ ।
સરસિજમકરન્દાસ્વાદતૃપ્તો મિલિન્દઃ
ક્વચિદપિ પિચુમન્દે ચિત્તવૃત્તિં તનોતિ ॥ ૫૩॥

જનનિ ખલકપોતન્યાયતઃ પાતુકાના-
મધિપદકમલં તે મન્દવૃન્દારકાણામ્ ।
ભવતુ નયનયોસ્તે ગોચરઃ ક્વાનતિર્મે
ન લસતિ પુનરુચ્ચૈઃ સ્વૈરમુદ્ગ્રીવિકા ચેત્ ॥ ૫૪॥

વિમલમુકુરબિમ્બં પુણ્ડરીકાતપત્રં
શિશિરકરસમાને ચામરે ચામરેશિ ।
કરિતુરગકદમ્બં શક્તિભિર્દિશ્યમાનં
જનય સફલમઞ્ચલ્લોચનાલોચનાભિઃ ॥ ૫૫॥

અથ કૃતપરિવારાભ્યર્ચનં તે સમર્પ્ય
સ્તુતિભિરનુપમાભિઃ પાવયે સ્વાં રસજ્ઞામ્ ।
યદપિ ન રવિરશ્મિઃ સ્વોપકારં વિધત્તે
તદપિ કમલમાલામ્લાનહાનિં તનોતિ ॥ ૫૬॥

શ્રવસિ વિશતિ યસ્ય ત્વન્મનોરેકવર્ણઃ
સકૃદપિ વિધિયોગાદમ્બિકે માનવસ્ય ।
લઘુતરફલમેતદ્ધત્ત્રિવર્ગાશ્રયત્વં
પરિચરતિ પુરસ્તાત્પૂરુષાર્થશ્ચતુર્થઃ ॥ ૫૭॥

હૃદયકમલમધ્યે ત્વાં સમાનીય માતઃ
પવનભરિતનાડીરન્ધ્રમુદ્રાવિધિજ્ઞાઃ ।
દધતિ પરમધન્યાઃ કુણ્ડલીસ્પર્શહૃષ્ય-
ચ્છશિગલદમૃતૌઘપ્લાવજન્યપ્રમોદમ્ ॥ ૫૮॥

વદતિ વિધિકલત્રં ત્વાં શિવે કોઽપિ કશ્ચિત્
ત્રિપુરમથનપુણ્યં શ્રીપતેઃ કોઽપિ ભાગ્યમ્ ।

પ્રકૃતિમિતિ પરેઽપિ પ્રૌઢવિજ્ઞાનમેકે
નિખિલનિગમમૂલં મન્મહે બોધમેવ ॥ ૫૯॥

કદા તવ પદામ્બુજસ્મરણજાતરોમોદ્ગમઃ
સદાશિવમદાલસે જનનિ માતરિત્યુદ્ગિરન્ ।
નિલીનકરણક્રિયસ્ત્રિદશગર્વસર્વઙ્કુષા-
મખર્વપદવીં ભજે હરિહરાદિભિર્ભાવિતામ્ ॥ ૬૦॥

ત્વદીયમુખચન્દિરે ચલિતલોચનેન્દિન્દિરે
પ્રસાદકુલમન્દિરે સ્થગિતપદ્મચન્દેન્દિરે ।
પ્રભાપટલતન્તુરે લલિતહાવકેલીપુરે
હૃતસ્મરહરાન્તરે ધૃતમતિર્ભવં સન્તરે ॥ ૬૧॥

ત્વદીયં યદ્રૂપં જનજનનિ બિન્દુત્રયયુતં
સ્મરન્નન્તર્યોગાત્ત્રિદિવપતિતામાપ સુરપઃ ।
ઇદં કો જાનીતે ક્ષણમપિ હરાર્ધં પ્રજપતાં
હસાર્ધં વ્યાલમ્બ્ય પ્રતિફલતિ હંસઃ પરિણતિઃ ॥ ૬૨॥

જનનિ નિભૃતં યત્તે રૂપં વદત્યતિશાશ્વતં
લસતુ હૃદિ નો દીપપ્રાયઃ સ કોઽપિ હસાત્મકઃ ।
સ્મરણવિષયે યેન સ્વૈરં સ્વરેણ વિજૃમ્ભતા
ત્રિપુરમથનઃ પ્રાપેશત્વં તદાત્મકતાં ગતઃ ॥ ૬૩॥

ઋચામાચાર્યાસિ સ્તુતિશતજુષાં ચાપિ યજુષાં
મહાધામ્નાં સામ્નાં પ્રથિતયશસોઽથર્વશિરસઃ ।
હરિબ્રહ્મેશાદ્યાઃ પ્રપદકિરણોત્તંસમુકુટા-
સ્તવાતસ્ત્વાં સ્તોતું જનજનનિ કો વા પ્રભવતુ ॥ ૬૪॥

ત્રસ્યત્ખઞ્જનગઞ્જનવ્યસનિનીમુન્માથિનીં માદ્યતો
જીવઞ્જીવકુલસ્ય ભૃઙ્ગપટલીન્યક્કારબદ્ધવ્રતામ્ ।
રઙ્કૂચ્છઙ્કુવિધાયિનીં ચ નલિનશ્રીગર્વસર્વઙ્કુષાં
કારુણ્યામૃતવર્ષિણીં મયિ શિવે દૃષ્ટિં મનાઙ્મોટય ॥ ૬૫॥

રિઙ્ગદ્ભૃઙ્ગકદમ્બડમ્બરપરિષ્વઙ્ગપ્રસઙ્ગાકુલ-
પ્રત્યૂષસ્ફુરમાણપઙ્કજવનીસૌભાગ્યસર્વઙ્કુષઃ ।
દૃક્કોણઃ કરુણાઙ્કુરાઙ્કિતતનુઃ કોઽપ્યદ્રિજે મદ્વપુઃ-
પાન્થત્વે તરસા ભવેત્પરિકરી ધન્યસ્તદા સ્યાં ન કિમ્ ॥ ૬૬॥

સમુદ્યન્માર્તણ્ડપ્રસૃમરકરાલીમસૃણયા
પદદ્વન્દ્વાનન્દપ્રણયિજનરિઙ્ગત્કરુણયા ।
લલલ્લીલાભાજા પરશિવપરિષ્વઙ્ગપરયા
ધિયા ચેતઃ કાલં નય ગતનય ત્વં ક્ષણમપિ ॥ ૬૭॥

વેદૈરઙ્ઘ્રિભિરુજ્જ્વલોપનિષદાં વૃન્દૈરધઃકલ્પિતૈઃ
શાસ્ત્રાદ્યૈરપિ તિર્યગૂર્ધ્વકલિતૈરોઙ્કારમાર્ગેણ ચ ।
વિષ્વઞ્માત્રનિબન્ધનૈઃ પરિચિતેઽસ્મિન્વાઙ્મયે પઞ્જરે
કીરી કાચન ચેતનૈકવિભવા ચિત્તે ચકાસ્તાચ્ચિરમ્ ॥ ૬૮॥

તરુણારુણપ્રતિમરમ્યરુચિં કુસુમેષુચાપસૃણિપાશકરામ્ ।
ત્રિગુણાત્પરાં ત્રિગુણરૂપમયીં ભવતીમહર્નિશમહં કલયે ॥ ૬૯॥

ઇતિ નિજમતિવૈભવાનુરૂપામકૃત કવિર્ભુવિ સામરાજનામા ।
સમયિજનમુદેઽમ્બિકાસપર્યામમૃતસુખાત્મકતાવિકાસપર્યામ્ ॥ ૭૦॥

ઇતિ શ્રીસત્યાનન્દનાથાપરનામધેયસામરાજદીક્ષિતવિરચિતે
પૂજારત્નવર્તિ ત્રિપુરસુન્દરીમાનસપૂજનસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*tripurasundarImAnasapUjanastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*